**श्री रमेशस्तुतिः (श्री वादिराजयति विरचित)**

प्रातः स्मरामि वरकुंडल-शोभिगंडं
शीतांशु-मंडल-मुखं सितवारिजाक्षम् ।
आताम्र-कम्र-मुदिताधर-बिंब-जृंभि
ध्यातृ-प्रहर्ष-कर-हासरासं रमेशम् ॥१ ॥
प्रातर्भजामि शुभ-कौस्तुभ-कंबुकंठं
स्फीतात्म-वक्षसि विराजित-भूरिहारम् ।
भीत-स्वभक्त-भय-भंजन-पाणिपद्मं
शातोदरार्पित-जगद्-भरमब्जनाभम् ॥२ ॥
प्रातर्नमामि शुभ-किंकिणि-मेखलांगं
पीतांबरं करि-करोरु-मुदारजानुम् ।
ध्यातांघ्रि-युग्म-रुचिरं जित-कंजजात-
वातादि-देव-वर-मौलि-मणिं मुकुंदम् ॥३ ॥
वादिराज-यति-प्रोक्तं श्लोक-त्रयमिदं शुभम् ।
प्रातःकाले पठन् मर्त्यः सर्वपापैः प्रमुच्यते ॥४ ॥
॥इति श्रीवादिराजयतिकृता रमेशस्तुतिः ॥